# ॥ श्री राधा कवच ॥

## ॥ श्री राधे राधे ॥

# Full Disclaimer

*This book is for educational, inspirational, and cultural purposes only. The remedies, rituals, affirmations, breathing methods, and spiritual practices described are based on traditional beliefs, historical customs, and personal development principles. They are not guaranteed solutions.*

*This book does not replace advice from licensed doctors, psychologists, financial advisors, lawyers, or other qualified professionals. If you have medical symptoms, mental health concerns, legal matters, or financial risk, seek professional help.*

*Use all remedies responsibly, ethically, peacefully, and according to local law. Do not use fire, herbs, fasting, incense, or physical practices in unsafe ways. The author and publisher are not liable for misuse.*

*Results in life depend on effort, discipline, timing, environment, skill, and many other factors. No spiritual method guarantees money, marriage, success, healing, or protection.*

Hargharpanditji
"PUJA ON YOUR SCREEN, BLESSINGS AT YOUR DOOR"

# ॥ श्री राधा कवच ॥

पार्वत्युवाच ।
कैलासवासिन् भगवन् भक्तानुग्रहकारक ।
राधिका कवचं पुण्यं कथयस्व मम प्रभो ॥१॥

यद्यस्ति करुणा नाथ त्राहि मां दुःखतो भयात् ।
त्वमेव शरणं नाथ शूलपाणे पिनाकधृत् ॥२॥

शिव उवाच ।
शृणुष्व गिरिजे तुभ्यं कवचं पूर्वसूचितम् ।
सर्वरक्षाकरं पुण्यं सर्वहत्याहरं परम् ॥३॥

हरिभक्तिप्रदं साक्षाद्भुक्तिमुक्तिप्रसाधनम् ।
त्रैलोक्याकर्षणं देवि हरिसान्निध्यकारकम् ॥४॥

सर्वत्र जयदं देवि सर्वशत्रुभयावहम् ।
सर्वेषां चैव भूतानां मनोवृत्तिहरं परम् ॥५॥

चतुर्धा मुक्तिजनकं सदानन्दकरं परम् ।
राजसूयाश्वमेधानां यज्ञानां फलदायकम् ॥६॥

इदं कवचमज्ञात्वा राधामन्त्रं च यो जपेत् ।
स नाप्नोति फलं तस्य विघ्नास्तस्य पदे पदे ॥७॥

## ॥ विनियोगः ॥

ऋषिरस्य महादेवोऽनुष्टुप् छन्दश्च कीर्तितम् ।
राधाऽस्य देवता प्रोक्ता रां बीजं कीलकं स्मृतम् ॥८॥

धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ।

## ॥ कवचम् ॥

श्रीराधा मे शिरः पातु ललाटं राधिका तथा ॥९॥

श्रीमती नेत्रयुगलं कर्णौ गोपेन्द्रनन्दिनी ।
हरिप्रिया नासिकां च भ्रूयुगं शशिशोभना ॥१०॥

ओष्ठं पातु कृपादेवी अधरं गोपिका तथा ।
वृषभानुसुता दन्तांश्चिबुकं गोपनन्दिनी ॥११॥

चन्द्रावली पातु गण्डं जिह्वां कृष्णप्रिया तथा ।
कण्ठं पातु हरिप्राणा हृदयं विजया तथा ॥१२॥

बाहू द्वौ चन्द्रवदना उदरं सुबलस्वसा ।
कोटियोगान्विता पातु पादौ सौभद्रिका तथा ॥१३॥

नखांश्चन्द्रमुखी पातु गुल्फौ गोपालवल्लभा ।
नखान् विधुमुखी देवी गोपी पादतलं तथा ॥१४॥

शुभप्रदा पातु पृष्ठं कुक्षौ श्रीकान्तवल्लभा ।
जानुदेशं जया पातु हरिणी पातु सर्वतः ॥१५॥

वाक्यं वाणी सदा पातु धनागारं धनेश्वरी ।
पूर्वां दिशं कृष्णरता कृष्णप्राणा च पश्चिमाम् ॥१६॥

उत्तरां हरिता पातु दक्षिणां वृषभानुजा ।
चन्द्रावली नैशमेव दिवा क्ष्वेडितमेखला ॥१७॥

सौभाग्यदा मध्यदिने सायाह्ने कामरूपिणी ।
रौद्री प्रातः पातु मां हि गोपिनी रजनीक्षये ॥१८॥

हेतुदा सङ्गवे पातु केतुमाला दिवार्धके ।
शेषाऽपराह्णसमये शमिता सर्वसन्धिषु ॥१९॥

योगनिी भोगसमये रतौ रतप्रिदा सदा ।
कामेशी कौतुके नति्यं योगे रत्नावली मम ॥२०॥

सर्वदा सर्वकार्येषु राधकिा कृष्णमानसा ।
इत्येतत्कथतिं देवि कविचं परमाद्भुतम् ॥२१॥

## ॥ फलश्रुत ि॥

सर्वरक्षाकरं नाम महारक्षाकरं परम् ।
प्रातर्मध्याह्नसमये सायाह्ने प्रपठेद्यद ि॥२२॥

सर्वार्थसद्धिस्तिस्य स्याद्यन्मनस िवर्तते ।
राजद्वारे सभायां च सङ्ग्रामे शत्रुसङ्कटे ॥२३॥

प्राणार्थनाशसमये यः पठेत्प्रयतो नरः ।
तस्य सद्धिर्भिवेद्देव ि न भयं वद्यिते क्वचति् ॥२४॥

आराधतिा राधकिा च तेन सत्यं न संशयः ।
गङ्गास्नानाद्धरेर्नामग्रहणाद्यत्फलं लभेत् ॥२५॥

तत्फलं तस्य भवत ि यिः पठेत्प्रयतः शुच ि।
हरद्रिारोचनाचन्द्रमण्डतिं हरचिन्दनम् ॥२६॥

कृत्वा लखित्विा भूर्जे च धारयेन्मस्तके भुजे ।
कण्ठे वा देवदेवेश ि स हरर्नित्र संशयः ॥२७॥

कवचस्य प्रसादेन ब्रह्मा सृष्टिं स्थतिं हिरः ि।
संहारं चाऽहं नयितं करोम ि कुरुते तथा ॥२८॥

वैष्णवाय वशिुद्धाय वरिागगुणशालनिे ।
दद्यात्कवचमव्यग्रमन्यथा नाशमाप्नुयात् ॥२९॥

**॥ इत ि श्रीनारदपञ्चरात्रे ज्ञानामृतसारे राधा कवचम् सम्पूर्णम् ॥**